Total No. of Questions : 10 | Total No. of Printed Pages : 2

Code No : S-03

Samskrita Examination - 2012

साहित्यम् - SAHITYA

Group - I

Paper III - Natakam Natakalakshanam Cha

नाटकं नाटकलक्षणं च

Date : 06.02.2012

Time : 9:00 AM - 12:00 PM | Max. Marks :100

'अ' भागः

**I. पञ्चप्रश्नानाम् उत्तरं लिखत ।** 5 X 2 = 10

१. मुद्राराक्षसं केन लिखितम् ?

२. नागानन्दनाटकस्य नायकः कः ?

३. मैत्रावरुणिः - कथं विग्रहः ?

४. राजगृहस्य वृद्धः अधिकारी कः ?

५. प्रतिमागेहे केषां राज्ञां प्रतिमाः स्थापिताः आसन् ?

६. दोहदः नाम कः ?

**II. शब्दपञ्चकस्य अर्थं लिखत ।** 5 X 1 = 5

१. नैत्यक । २. उपत्यक । ३. रात्रिंदिवम् । ४. तुपानलः ।
५. विकर्तनः । ६. गहनम् ।

**III. एतेषां पद्यानां भावार्थं लिखत ।** 4 X 6 = 24

१. अगर्जदगिरिकुञ्जरघटानिस्तीर्णज्वर-
ज्यानिघोषममन्ददुन्दुभिवैराध्मातमुज्जृम्भयन् ।
वैल्लद्भैरवरुण्डखण्डनिकरैर्वीरो विधत्ते भुवं
तृष्यत्कालकरालवक्त्रविघसव्याकीर्यमाणामिव ।।

२. दह्यमानेन मनसा दैवाद् वत्सां विहाय सः ।
लोकोत्तरेण सत्त्वेन प्रजापुण्यैश्च जीवति ।।

३. स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते वृत्तिरेवंविधैव ।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम् ।।

४. अग्रेसरीभवतु काञ्चनमयरत्नम्
एष द्विपश्च धवलैर्दशनैश्चतुर्भिः ।
श्यामो हरिर्मलयवत्यपि चेत्यमूनि
रत्नानि ते समवलोकय चक्रवर्तिन् ।।

**IV. अनुक्रमेण संयोजयत ।** 6 X 1 = 6

| अ | आ |
|---|---|
| १. कालिदासः | (क) उत्तररामचरितम् । |
| २. भासः | (ख) नागानन्दः । |
| ३. भवभूतिः | (ग) हर्षचरितम् । |
| ४. श्रीहर्षः | (घ) शाकुन्तलम् । |
| ५. विशाखदत्तः | (ङ) प्रतिमानाटकम् । |
| ६. बाणः | (च) मुद्राराक्षसम् । |

**V. कः कं प्रति कदा किमर्थमुक्तवानिति लिखत (त्रयाणाम्) ।** 3 X 5 = 15

१. लोकान्तरगतेनापि नोज्झितो विनयक्रमः ।
२. दुःखसंवेदनायैव रामे चैतन्यमागतम् ।
३. आर्यतुल्याकृती वीरौ वयसा द्वादशाब्दिकौ ।
४. तदेषा भवतः कान्ता त्यज वैनां गृहाण वा ।

**'आ' भागः**

**VI. द्वयोः टिप्पणीं लिखत ।** 2 X 5 = 10

१. रूपकाणि । २. अर्थप्रकृतयः । ३. अवस्थाः ।

**VII. द्वयोः श्लोकयोः भावार्थं लिखत ।** 2 X 5 = 10

१. अर्थोपक्षेपकाः पञ्च विष्कम्भकप्रवेशकौ ।
चूलिकाङ्कावतारोऽथ स्यादङ्कमुखमित्यपि ॥

२. नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः ।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश ॥

**VIII. समुचितपदयोजनं कुरुत ।** 5 X 1 = 5

१. काव्यं ........। (पञ्चविधं, त्रिविधं, द्विविधम्)
२. दुर्योधनः एतादृशः नायकः - ............ । (धीरोदात्तः, धीरशान्तः, धीरोद्धतः)
३. तथाप्यवश्यं कर्तव्या नान्दी .......... । (धर्मोपशान्तये, विघ्नोपशान्तये, अर्थोपशान्तये)
४. पूर्वरङ्गं विधायैव ....... निवर्तते । (नायकः, प्रतिनायकः, सूत्रधारः)
५. नाटकं ख्यातवृत्तं स्यात् ........सन्धिसमन्वितम् । (सप्त, षट्, पञ्च)

**IX. उचितानि पदानि योजयत ।** 5 X 1 = 5

| अ | आ |
|---|---|
| १. धीरोदात्तः | क. वत्सराजः । |
| २. धीरोद्धतः | ख. चारुदत्तः । |
| ३. धीरललितः | ग. रसः । |
| ४. धीरशान्तः | घ. रामः । |
| ५. शान्तः | ङ. दुर्योधनः । |

**X. प्रकरणस्य लक्षणम् उदाहरणं च लिखत** अथवा **व्यायोगस्य लक्षणम् उदाहरणं च लिखत ।** 10

* * * *